Reg. No. .. . . . . . . . . . . . . . . . . . . . .
Name : . . . . . . . . . . . . . . . . . . . . . . .

# HIGHER SECONDARY MODEL EXAMINATION 2011

## PART-II SANSKRIT

**HSE - II**

Max. Score : 80
Time : 2.½ Hrs.
Cool-off time 15 Mtd.

---

*निर्देशाः* - (1) *सर्वे प्रश्नाः समाधेयाः।* (2) *प्रश्नान् प्रश्ननिर्देशान् च सावधानं पठित्वा उत्तरत।*
(3) *प्रश्नानां वाचनाय* 15 *निमेषाः कल्पिताः।*

---

**I. उदाहरणानुसारं विश्लेषयत —** (1x2=2)

1. बालाश्च - बालाः + च । मखाश्च - . . . . . . . + . . . . . . . . .

2. छात्रो विष्णुः - छात्रः + विष्णुः । श्यामो युवा - . . . . . . . + . . . . . . . . .

**II. श्लोकं पठित्वा गद्यक्रमं पूरयत —** (3)

नियम्य सा मातुल इत्यमर्षं प्रसेदुषी मामवदच्च बाला।
अरिर्महीयानजनिष्ट भूमौ तवोचितं सम्प्रति चिन्तयेति।।

सा बाला ..............इति ...... नियम्य प्रसेदुषी माम् अवदच्च। तव महीयान् ......... भूमौ अजनिष्ट। सम्प्रति उचितं चिन्तय इति।

**III. सूचनानुसारम् उपन्यसत – कंसस्य भाषणम्।** (8)

सूचनाः - अमात्यान् समाहूतवान्। भगिन्याः सुताः हताः। विनिद्रः रजनीम् अनैषम्। सरसीरुहाक्षः अजायत। अयमर्थः नारदेन उक्तः। सः मत्सकाशात् वधम् अर्हति। अमरावती नः हस्ते भविष्यति।

**IV. कोष्ठकात् समुचितम् उत्तरं निर्धार्य लिखत –** (1×5=5)

1. श्रीकृष्णविलासकाव्यं केन लिखितम्? ( कालिदासेन, भासेन, सुकुमारकविना )
2. हता नृशंसेन सुताः भगिन्याः। नृशंसः कः? ( कृष्णः, प्रलम्बः, कंसः )
3. तपसा तव नन्दगोप मन्ये फलितं जन्मसहस्रसञ्चितेन। कस्य वचनम्?( वसुदेवस्य, नन्दगोपस्य, कंसस्य )
4. मुग्धभावमधुरेण रञ्जयन् शैशवेन हृदयम् व्रजौकसाम्। कः? ( प्रलम्बः, गोपः, कृष्णः )
5. सा पपात भुवि घोरनिस्वना। का? ( यशोदा, पूतना, प्रलम्बः )

**V. 'आह्लादपूर्णं गोकुलं गच्छतु' एतदाशयप्रतिपादकः श्लोकः कः इति लिखत –** (2)

1. प्रतिवेदि निविष्टपूर्णकुम्भं विलसत्तोरणमुज्वलत्प्रदीपम्।
व्रज गोकुलमाकुलं प्रजाभिः भवदीयागमनप्रहर्षिणीभिः ।।

2. सर्वे वयं दैत्यकुलप्रसूताः केनापि जाता भुवि कारणेन।
स तेन सन्नह्यति जेतुमस्मान् उक्तोऽयमर्थः किल नारदेन।।

**VI. एकं पत्रं लिखत —** सूचनाः - भवतः विद्यालये युवजनोत्सवं भवति। जनुवरि १५ तः १९ पर्यन्तम्।

अखिलेशः भवतः मित्रम्। भवान् संस्कृतपद्योच्चारणे भागं गृह्णाति। सुहृदः सान्निध्यम् इच्छति । (6)

**VII.** **प्रदत्तान् नाटकसङ्केतान् अधिकृत्य लघुटिप्पणीः लिखत –** (2×4=8)

क) नान्दी ख) स्थापना ग) सूत्रधारः घ) भरतवाक्यम्

**VIII.** **प्रदत्तभागात् क्त्वान्तल्यबन्ततुमुन्नन्तानि अव्ययानि चित्वा लिखत –** (1×3=3)

दुर्योधनाज्ञां स्वीकृत्य भृत्यः मन्त्रशालां रचयति। दुर्योधनः मन्त्रशालां गत्वा उपविष्टवान्।
तस्य मनसि सेनापतिं चिनोतुम् इच्छा आसीत्।

**IX.** **अधः प्रदत्तं श्लोकं पठित्वा आस्वादनटीकां लिखत :–** (4)

शकटं मधुसूदनस्य दृष्ट्वा चरणोदञ्चनविभ्रमेण भग्नम्।
अथ वारिनिधेर्विवेश गर्भं स्वरथस्यापि विशङ्क्य भङ्गमर्कः।।

**X.** **कृष्णस्य दौत्यं प्रति उपन्यस्यत –**(सूचनाः–दायाद्य विभज्यताम्।ते जनकः कथं राज्यं लभेत।अलं तन्मद्दोषतो ज्ञातुम्। तिष्ठतु तावदस्मद्गतः परिहासः। न जानीषे अर्जुनस्य बलपराक्रमम्। पाण्डवाः राज्यं हरिष्यन्ति।)(8)

**XI.** **सूचनानुसारं दुर्योधनस्य चित्रपटदर्शनम् उपन्यसत।** सूचनाः – राहुवक्त्रान्तरगता चन्द्रलेखेव। गाण्डिवज्यां समाकर्षति। मृगपोतौ हरिमिव अभिप्रयातौ। युधिष्ठिरः निवारयति। गान्धारराजः काक्षेण पश्यति। (8)

**XII.** **प्रदत्तं गद्यभागं मातृभाषया अनुवदत –** (5)

अहं द्वादशकक्ष्यायां पठामि। अद्य संस्कृतपरीक्षां प्रचलति। एषा सरला परीक्षा। संस्कृतभाषा उत्तमा भाषा भवति। एतदनन्तरमपि अहं संस्कृतं पठिष्यामि।

**XIII.** **प्रदत्तेषु भवतः इष्टतमः श्लोकः क इति सयुक्तिकं लिखत –** (4)

1. अतस्तदुच्छेदविधौ विनिद्राः यतध्वमद्यैव बलानुरूपम्।
   नखाग्रलाव्यस्तरुरङ्कुरात्मा परश्वधस्यापि ततोऽतिभूमिः।।
2. वदनं मधुसूदनः कराभ्यां चरणांगुष्ठमुपानयत् पिपासुः।
   गळितेव ततस्सुरस्रवन्ती नखमुक्तामणिदीधितिच्छलेन।।
3. परितस्फुरता नवेन सन्ध्यामहसा पल्लवपाटलेन लिप्ताः।
   पतिता इव पावके विरेजुः ककुभो दुस्सहभानुविप्रयोगात्।।

**XIV.** **संस्कृतभाषया अनुवदत –** (1×3=3)

**1**.എന്റെ രാജ്യം ഭാരതമാണ്. **2**.ഇവിടെ ഉത്തമസംസ്ക്കാരം ഉ്. 3.ഇതിനാശ്രയം സംസ്കൃതമാണ്.

**XV.** **त्वम् अपि सज्जय कर्ण! कर्णौ।** **1**.अत्र अव्ययपदं किम्? **2**.संबोधनापदं किम्? (1×2=2)

**XVI.** **श्लोकं पठित्वा अधः प्रदत्तानां प्रश्नानाम् उत्तराणि लिखतः–** (1×4=4)

दानेन पाणिर्नतु कङ्कणेन मानेन तृप्तिर्नतु भोजनेन।
स्नानेन शुद्धिर्नतु चन्दनेन ज्ञानेन मुक्तिर्नतु मुण्डनेन।।

**1.** पाणिः कथं शोभते? **2.**भोजनेन किं न लभ्यते? **3.**शुद्धिः कथं लभ्यते? **4.**ज्ञानेन किं लभ्यते?

**XVII.** **राहुवक्त्रान्तरगता चन्द्रलेखेव शोभते। अत्र सूचितां कथां लिखत –** (5)

सूचनाः – क्षीरवारिनिधेः मथनम् । असुराणाम् अमृतापहरणम् । विष्णोः मोहिनीरूपम् । सिंहिकेयस्य अमृतपानम् । सूर्यचन्द्रयोः द्वारपालकत्वम् । सिंहिकेयस्य शिरच्छेदः । चन्द्रं प्रति तस्य कोपः ।